# ।। संस्कृतप्रवेशिका ।।

सङ्ग्राहकः

डा मुरलीश्यामः।

श्री सत्यसाई-मानव-अभ्युदय-विश्वविद्यालयः।

कल्बुर्गी कर्नाटकम्।

The sanskrita praveshika book for beginners in Sanskrit. Collected and edited by Dr. Muralisham.H.

**Price-**

Published year 2020

Publisher -self

Copies 50

**Printer-**

Manasa printers

Basava belagu house

Sharanappa tadakkal lay out

Mahagaon cross kalburgi 858316

**Publisher-**

Dr. Muralisham H

Asst Professor

Sri Sathya Sai University for Human Excellence

## ।।श्री-सत्यसाई-मानव-अभ्युदय-विश्वविद्यालयः।।

## ।। संस्कृतविभागः ।।

## ।। तृतीयः षण्मासिकः पाठ्यक्रमः।।

| अध्यायः | प्रधानविषयः | विषयः | पत्रसंख्या |
|---|---|---|---|
| 1st Unit | 1.1 भविष्यत्कालः | लृट् लकारः। | |
| | 1.2 पुंलिङ्गशब्दः। | पुल्लिङ्गशब्दरूपाणां परिचयः। | |
| | 1.3 संख्या | 1....100 | |
| | 1.4 वचनम् | त्रयाणां वचनानां परिचयः | |
| 2nd Unit | 2.1 विभक्तयः | षष्ठी एवं सप्तमी विभक्तिः। | |
| | 2.2 क्रियापदानि | क्रियापदानि। | |
| | 2.3 स्त्रीलिङ्गशब्दाः | स्त्रीलिङ्गे सप्तविभक्तिषु क्रियाः | |
| | 2.4 पठनम् | प्रबन्धलेखनम् | |
| 3rd Unit | 3.1 नपुंसकलिङ्गशब्दाः | अव्ययानाम् उपयोगः | |
| | 3.2 लेखनकौशलम् | प्रबन्धलेखनम् | |
| | 3.3 भविष्यत्कालः। | भविष्यत्कालः | |
| | 3.4 चर्चा | संस्कृते चर्चा | |
| 4th Unit | शब्दसामर्थ्यवर्धनम्। | प्रतिदिनं नूतनज्ञानस्य अन्वेषणम्।<br>प्रतिदिनं पठितविषये अध्ययनं लेखनं च। | |

## ।। प्रथमः पाठः।।

### 1.1 भविष्यत्कालः।।

।। राणाप्रतापः।।




मेवाडराज्यं बहूनां शूराणां जन्मभूमिः। तस्य राजा उदयसिंहः आसीत्। उदयसिंहस्य शासनकाले मेवाडचित्तौडादीनि स्थानानि शत्रुवशं गतानि। उदयसिंहस्य मरणस्य अनन्तरं तत्पुत्रः राणाप्रतापः सिंहासनम् आरूढवान्।

हस्तच्युतानां भागानां प्रतिप्राप्तिः कथम् ? इति विचिन्त्य सः पुरप्रमुखाणां सभाम् आयोजितवान्। तत्र सः प्रतिज्ञां कृतवान् – "चित्तौडस्थानं यावत् कालं न प्रतिप्राप्स्यामि, तावत् कालं सुवर्णपात्रे भोजनं न करिष्यामि। राजप्रासादे वासं न करिष्यामि। मृदुतल्पे शयनम् अपि न करिष्यामि" इति। तदा पुरप्रमुखाः अवदन् – "राजन् एव सुखं त्यक्ष्यति चेत् वयं कथं वा सुखम् अनुभविष्यामः**?** अतः वयम् अपि सुखसाधनानि त्यक्ष्यामः। देशाय यथाशक्ति धनं दास्यामः। अस्मत्पुत्रान् सैन्यं प्रति प्रेषयिष्यामः।" इति।

एतदनन्तरं ग्रामप्रमुखाः अवदन्। - "वयं धान्यागारं धान्येन पूरयिष्यामः। उत्तमकृषिं कृत्वा अधिकधान्यानि उत्पादयिष्यामः। ग्रामे आयुधानि सज्जीकरिष्यामः। युवकान् युद्धकलां बोधयिष्यामः। अद्यैव कार्यारम्भं करिष्यामः।" इति। एतत् श्रुत्वा राणाप्रतापः अवदत्। -"यदि वयं सर्वे सम्भूय कार्यं करिष्यामः तर्हि नष्टानि राज्यानि प्रतिप्राप्स्यामः एव। प्रमुखाः वयं यथा व्यवहरिष्यामः तथा जनाः व्यवहरिष्यन्ति। वयम् अनुकरणयोग्याः भविष्यामः चेत् समग्रः देशः प्रेरितः भविष्यति। जनाः यदि कष्टानि सोढुं सज्जाः भविष्यन्ति, तर्हि असाध्यम् अपि साध्यं भविष्यति। वयं पूर्णसन्नाहं करिष्यामः। योग्ये काले युद्धम् उद्घोषयिष्यामः।" इति। तदा जनाः उत्थाय "जयतु राणाप्रतापः जयतु मेवाडराज्यम् "इति जयघोषं कृतवन्तः।

| | | |
|---|---|---|
| करिष्यति | करिष्यतः | करिष्यन्ति। |
| करिष्यसि | करिष्यथः | करिष्यथ। |
| करिष्यामि | करिष्यावः | करिष्यामः। |

**I.** एतेषां भविष्यत् रूपाणि लिखन्तु।

1. करोति <u>करिष्यति</u> करिष्यामि।
2. अनुभवति ............ .............।
3. प्राप्नोति ............. ............।
4. प्रेषयति .............. ............।
5. उपविशति उपवेक्ष्यति उपवेक्ष्यामि।
6. उत्तिष्ठति उत्थास्यति ….................।
7. शृणोति श्रोष्यति ...................।
8. त्यजति त्यक्ष्यति ...................।
9. पचति पक्ष्यति ...................।
10. लभते लप्स्यते ...................।
11. क्रीणाति क्रेष्यते ...................।

**II.** पुरुषवचनानुगुणं भविष्यत् रूपाणि लिखन्तु।

| | | |
|---|---|---|
| वर्तमानकाले | प्रथमपुरुषे | उत्तमपुरुषे |
| करोमि | करिष्यामि | ........। |
| त्यजन्ति | .................. | ............। |
| लिखामः | .................. | ............। |
| गच्छति | गमिष्यति | गमिष्यामि। |
| पठति | पठिष्यति | पठिष्यामि । |
| लिखति | लेखिष्यति | लेखिष्यामि। |
| करोति | करिष्यति | करिष्यामि। |
| हसति | हसिष्यति | हसिष्यामि। |
| वदति | वदिष्यति | वदिष्यामि। |
| नमति | नंस्यति | ............। |
| नयति | नयिष्यति | ............। |
| आगच्छति | आगमिष्यति | ............। |
| सूचयति | सूचयिष्यति | ............। |
| स्वीकरोति | स्वीकरिष्यति | .........। |
| रोदिति | रोदिष्यति | ..........। |
| शक्नोति | शक्ष्यति | ..........। |
| तिष्ठति | स्थास्यति | ..........। |
| कथयति | कथयिष्यति | ..........। |
| वर्धते | वर्धिष्यते | वर्धिष्ये । |
| मोदते | मोदिष्यते | मोदिष्ये। |
| भाषते | भाषिष्यते | भाषिष्ये। |
| स्पर्धते | स्पर्धिष्यते | स्पर्धिष्ये। |
| यतते | यतिष्यते | यतिष्ये। |

बहुवचनरूपाणि।

| | | |
|---|---|---|
| वर्तमानकाले | प्रथमपुरुषे | उत्तमपुरुषे |
| गच्छन्ति | गमिष्यन्ति | गमिष्यामः। |
| पठन्ति | पठिष्यन्ति | पठिष्यामः। |
| लिखन्ति | लेखिष्यन्ति | लेखिष्यामः। |
| कुर्वन्ति | करिष्यन्ति | करिष्यामः। |
| हसन्ति | हसिष्यन्ति | हसिष्यामः। |
| वदन्ति | वक्ष्यन्ति | वक्ष्यामः। |
| नमन्ति | नंस्यन्ति | ............। |
| नयन्ति | नेष्यन्ति | ............। |
| आगच्छन्ति | आगमिष्यन्ति | ............। |
| सूच्यन्ति | सूचयिष्यन्ति | ............। |
| स्वीकुर्वन्ति | स्वीकरिष्यन्ति | ............। |
| रोदन्ति | रोदिष्यन्ति | ............। |
| शक्नुवन्ति | शक्ष्यन्ति | ............। |
| तिष्ठन्ति | स्थास्यन्ति | ............। |
| कथयन्ति | कथयिष्यन्ति | ............। |
| वर्धन्ते | वर्धिष्यन्ते | वर्धिष्यामहे। |
| मोदन्ते | मोदिष्यन्ते | मोदिष्यामहे। |
| भाषन्ते | भषिष्यन्ते | भाषिष्यामहे। |
| स्पर्धन्ते | स्पर्धिष्यन्ते | स्पर्धिष्यामहे। |
| यतन्ते | यतिष्यन्ते | यतिष्यामहे । |

## ।। लृट् लकारः।।

संस्कृतभाषायां विभिन्नकालस्य अर्थस्य च सूचनार्थं दशविधाख्यातप्रत्ययान् संयोज्य क्रियापदानि रचयन्ति । सामान्यतः कालः त्रिधा विभज्यते । क्रियमाणं कार्यं सूचयितुं वर्तमानकालस्य क्रियापदानि उपयुज्यन्ते । कृतं कार्यं सूचयितुं भूतकालस्य क्रियापदानि उपयुज्यन्ते । करिष्यमाणं कार्यं सूचयितुं भविष्यत्कालस्य क्रियापदानि उपयुज्यन्ते । किन्तु संस्कृते कालः षोढा (६) विभज्यते ।

समयवशात् भाववशात् धातवः कृताः सन्ति। तेषां दशधा विभागः अस्ति। ते च अग्रे प्रदत्ताः। लट् – वर्तमाने , लङ् – अनद्यतनभूते , लिट् लकारः – परोक्षभूतकाले , लुङ् - तृतीयभूतकालः / सामान्यभूतकालः

लुट् - प्रथम-भविष्यत्कालः / अद्यतनभविष्यत्कालः , लृट् - द्वितीय-भविष्यत्कालः / सामान्यभविष्यत्कालः

लेट् – वेदप्रयोगे , षट्-लकाराः इव चत्वारः अर्थाः सन्ति । लोट् – आज्ञार्थः । विधिलिङ् – विध्यर्थः। आशीर्लिङ् – आशीरर्थः । लृङ् – सङ्केतार्थः। एते सर्वे लकारतः आरब्धाः इत्यतः एते दश लकाराः इति उच्यन्ते । तान् सुलभतया स्मर्तुं संस्कृते कश्चन श्लोकः विद्यते -

लट् वर्तमाने लेट् वेदे भूते लङ् लुङ् लिटस्तथा ।

विध्याशिषोश्च लिङ्लोटौ लुट् लृट् लृङ् च भविष्यति ॥

क्रियाफलवशात् प्रत्ययाः भवन्ति। यदि क्रियायाः फलं परस्मै प्राप्नोति तर्हि परस्मै पदी भवति। क्रियाफलम् आत्मने अर्थात् स्वयमेव प्राप्नोति आत्मनेपदी इति भवति। तदुक्तं च यथा-

क्रियाफले कर्तृगामिनी सति आत्मनेपदप्रत्ययाः ।।
अन्यगामिनी तु परस्मैपदप्रत्ययाः इत्यर्थः।।

### लृट्लकारः – भविष्यत्कालः।

लृट् लकारः भविष्यत्कालं बोधयति । अयम् आर्धधातुकेषु अन्यतमः वर्तते । एषः सामान्यभविष्यत्कालः इत्यपि उच्यते । सामान्यभूतकालः इव अद्य यद् करिष्यते कालनिर्देशं विना भविष्यत्काले यद् करिष्यते तस्य कथनाय लृट्लकारस्य उपयोगः क्रियते । उदा - अद्य रामायणं पठिष्यति ।

पठ् धातोः लृट् लकारे रूपाणि

| लृट् लकारः(परस्मैपदम्) | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठिष्यति | पठिष्यतः | पठिष्यन्ति। |
| मध्यमपुरुषः | पठिष्यसि | पठिष्यथः | पठिष्यथ। |
| उत्तमपुरुषः | पठिष्यामि | पठिष्यावः | पठिष्यामः। |

अत्र भविष्यकालम् उपयुज्य एकः श्लोकः प्रदत्तः वर्तते। पठन्तु।

रात्रिर्गमिष्यति भविष्यति सुप्रभातम्। भस्वानुदेष्यति हसिष्यति पंकजश्रीः।

इत्थं विचिन्तयन् कोषगते द्विरेफे। हा हन्त हन्त नालिनीमगजमुज्जहार ।।

| लृट् लकारः(परस्मैपदम्) | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | स्यति | स्यतः | स्यन्ति |
| मध्यमपुरुषः | स्यसि | स्यथः | स्यथ |

| | | | |
|---|---|---|---|
| उत्तमपुरुषः | स्यामि | स्यावः | स्यामः |

लृट् (आत्मनेपदम्) लकारस्य आख्यातप्रत्ययाः(तिङ्प्रत्ययाः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | स्यते | स्येते | स्यन्ते |
| मध्यमपुरुषः | स्यसे | स्येथे | स्यध्वे |
| उत्तमपुरुषः | स्ये | स्यावहे | स्यामहे |

प्रथमपुरुषः सा/सः वन्दिष्यते ते/ तौ वन्दिष्येते ते/ ताः वन्दिष्यन्ते।

मध्यमपुरुषः त्वं वन्दिष्यसे युवां वन्दिष्येथे यूयं वन्दिष्यध्वे।

उत्तमपुरुषः अहं वन्दिष्ये आवां वन्दिष्यावहे वयं वन्दिष्यामहे।

।। अभ्यासः ।।

रिक्तस्थानानि पूरयत।(भविष्यति या अस्ति)

1. अद्य रविवासरः अस्ति। श्वः चन्द्रवासरः……………।
2. अद्य शनिवासरः अस्ति। श्वः ..................................।
3. अद्य शुक्रवासरः अस्ति। श्वः ……...........................।
4. अद्य गुरवासरः अस्ति। श्वः ……...........................।
5. अद्य साई ग्रामं गच्छति। श्वः साई ग्रामं ............................।
6. मम मातुलः मुद्देनहल्लीतः आगच्छति। मम मातुलः मुद्देनहल्लीतः .....................................।
7. अहं संस्कृतविद्वान् अवश्यं भवामि। अहम् अग्रे संस्कृतविद्वान् अवश्यं .............................।
8. भवन्तः साधून् पीडयन्ति चेत् कष्टम् अनुभवन्ति। भवन्तः साधून् पीडयन्ति चेत् कष्टं ............।
9. दुष्टान् आरक्षकः दण्डयति। दुष्टान् आरक्षकः ......................................।
10. त्वं परिश्रमेण उत्तीर्णः भवसि। त्वं परिश्रमेण उत्तीर्णः भविष्यसि।
11. तौ अद्य राजधानीं गच्छतः। तौ श्वः राजधानीं गमिष्यतः।
12. आवां गीतं गायावः। आवां गीतं गास्यावः।
13. आवां पठने प्रयासं कुर्वः। आवां पठने प्रयासं करिष्यावः।

अभ्यासः (भविष्यति अस्ति)

- अङ्कुरः अधुना वृक्षः अस्ति। वृक्षे फलम् ................।
- शिशुः अस्ति। बालकः .......................।
- युवकः पूर्वं बालकः.........। समाजोपयोगाय ........................।
- बालिका अधुना पठति। अग्रे वैद्या भविष्यति।
- मेघः .....................। वृष्टिः ...................।

भविष्यति। पूर्वम् आसीत्।

1. वृक्षः ...........। अङ्कुरः आसीत्।
2. वृद्धः................। युवकः .............।
3. दरिद्रः .............। धनिकः.............।
4. मूर्खः ...............। विद्वान्................।

उदाहरणानुसारं भूतकालरूपैः पूरयन्तु।

| वर्तमाने। | भूते। | भविष्यत्काले। |
|---|---|---|
| गच्छति | ......................... | गमिष्यति। |
| वदति। | अवदत्। | वदिष्यति। |
| चलति। | ....................... | चलिष्यति |
| हसति। | .................... | ........................। |
| नयति। | .................... | ........................। |
| क्रीडति। | .................... | ........................। |
| पश्यति। | .................... | ........................। |
| हरति। | .................... | ........................। |
| मिलति। | .................... | ........................। |
| पिबति। | .................... | पास्यति। |
| स्मरति। | ......................... | ............................। |
| नमति | ...................... | नंस्यति। |
| ददाति | ...................... | दास्यति। |
| गायति | ...................... | गास्यति। |
| पश्यति | ...................... | द्रक्ष्यति। |
| क्रीणाति | ...................... | क्रेष्यति। |
| जानाति | ...................... | ज्ञास्यति। |
| शृणोति | ...................... | श्रोष्यति। |
| पृच्छति | ...................... | प्रक्ष्यति। |
| नयति | ...................... | नेष्यति। |
| त्यजति | ...................... | त्यक्ष्यति। |

।। अभ्यासः।।

वर्तमानकालात् भविष्यकाले परिवर्तनम्।

| वर्तमाने | भविष्यत्काले। |
|---|---|
| एषः पठति। | एषः पठिष्यति। |
| सा क्रीडति। | ..................। |
| अहं पठामि। | ..................। |
| वयं लिखामः। | ..................। |

## ।। अभ्यासकथा ।।

कस्मिंश्चित् नगरे कश्चन दरिद्रः वसति स्म। सः भिक्षाटनेन जीवनयापनं करोति स्म। कदाचित् सः पिष्टेन पूर्णम् एकं घटं प्राप्तवान् सः तं घटं नागदन्ते स्थापितवान्। सः अधः उपविश्य घटमेव पश्यति स्म।

एकदा रात्रौ सः इत्थम् अचिन्तयत् "यदि देशे दुर्भिक्षः ................................(भवति) तर्हि एतस्य शतरूप्यकाणि मूल्यं ........................(भवति) तदा अहं एतस्य विक्रयणं कृत्वा तेन धनेन अजद्वयं........... (क्रीणामि)। कालान्तरे तेन अजसमूहः.............। अनन्तरम् अजसमूहस्य विक्रयणं कृत्वा महिषीः, ताः विक्रीय अश्वान् च ...............(क्रीणामि)। तान् अपि विक्रीय यथेष्टं धनं .................(सम्पादयामि)। बृहत् गृहं .....................(निर्माणं करोमि)। तदा कश्चित् ब्राह्मणः आगत्य रूपवतीं स्वकन्यां मह्यं ................(ददाति)। अनन्तरं मम पुत्रः उत्पन्नः ....................(भवति)। तदानीं सा मां सेवां (करोति)।

## 1.2 ।। पुंलिङ्गशब्दाः।।

संस्कृतभाषायां पुल्लिङ्गपादनि स्त्रीलिङ्गपदानि नपुंसकलिङ्गपदानि चेति त्रिधा भवन्ति। पदेषु अन्तिमः वर्णः यदि दीर्घवर्णः स्यात् तर्हि सामान्यतया स्त्रीलिङ्गपदानि भवन्ति। उदाहरणार्थम् - छात्रा, लता, प्रयोगशाला, लेखिका, शिक्षिका, पेटिका, माला, सेविका, नौका, छुरिका, कालिका, गायिका, अग्निपेटिका, मापिका, वीणा, उत्पीठिका, सूचिका, कुञ्चिका, पिपीलिका, उत्पिठिका, मक्षिका इत्यादि। अन्तिमः वर्णः अ अथवा विसर्गः चेत् सामान्यतया पुल्लिङ्गपदानि भवन्ति। उदा- रामः हरिः सेथुःइत्यादि। तेषां सप्तसु विभक्तिषु रूपाणि अधः प्रदत्तानि वर्तन्ते। पठन्तु।

<u>शब्दरूपाः -:</u> राम**,** हरि**,** फल**,** देव**,** पितृ**,** पुस्तक**,** साधु**,** लता**,** रमा**,** मातृ**,** नदी**,**गुरु**,**एक**,**द्वि**,** त्रि**,**चतुर**,** एते पुल्लिङ्गशब्दाः। अत्र दशविधपुल्लिङ्गशब्दाः कथिताः। ते रामः, हरि, करी, भूभृत्, भानु, कर्ता, चन्द्रमस्, तस्थिवस्, आत्मन्, भगवत् इति भवन्ति।

रामो हरि करी भूभृत् भानु कर्ता च चन्द्रमाः।
तस्थिवान् भगवानात्मा दशैते पुंसिनायकाः।।

| अकारान्तः पुल्लिङ्गः राम शब्दः । | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | रामः | रामौ | रामाः |
| द्वितीया | रामम् | रामौ | रामान् |
| तृतीया | रामेण | रामाभ्याम् | रामैः |
| चर्तुथी | रामाय | रामाभ्याम् | रामेभ्यः |
| पन्चमी | रामात् | रामाभ्याम् | रामेभ्यः |
| षष्ठी | रामस्य | रामयोः | रामाणम् |
| सप्तमी | रामे | रामयोः | रामेषु |
| सम्बोधन | हे राम | हे रामौ | हे रामाः |

हरिः**(**इकारान्त पुंल्लिङ्गः**)**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | हरिः | हरी | हरयः |
| द्वितीया | हरिम् | हरी | हरीन् |
| तृतीया | हरिणा | हरिभ्याम् | हरिभिः |
| चतुर्थी | हरये | हरिभ्याम् | हरिभ्यः |
| पञ्चमी | हरेः | हरिभ्याम् | हरिभ्यः |
| षष्ठी | हरेः | हर्योः | हरीणाम् |
| सप्तमी | हरौ | हर्योः | हरिषु |
| सम्बोधन | हे हरे ! | हे हरी ! | हे हरयः ! |

गुरुः (उकारान्त पुल्लिङ्गः)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | गुरुः | गुरू | गुरवः |
| द्वितीया | गुरुम् | गुरू | गुरुन् |
| तृतीया | गुरुणा | गुरुभ्याम् | गुरुभिः |
| चतुर्थी | गुरुवे | गुरुभ्याम् | गुरुभ्यः |
| पञ्चमी | गुरोः | गुरुभ्याम् | गुरुभ्यः |
| षष्ठी | गुरोः | गुर्वोः | गुरूणाम् |
| सप्तमी | गुरौ | गुर्वोः | गुरुषु |
| सम्बोधन | हे गुरो! | हे गुरु! | हे गुरवः! |

साधुः (उकारान्त पुल्लिङ्गः)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | साधुः | साधू | साधवः |
| द्वितीया | साधुम् | साधू | साधून् |
| तृतीया | साधुना | साधुभ्याम् | साधुभिः |
| चतुर्थी | साधवे | साधुभ्याम् | साधुभ्यः |
| पञ्चमी | साधोः | साधुभ्याम् | साधुभ्यः |
| षष्ठी | साधोः | साध्वोः | साधूनाम् |
| सप्तमी | साधौ | साध्वोः | साधुषु |
| सम्बोधन | हे साधो! | हे साधू! | हे साधवः |

पितृ(ऋकारान्त पुल्लिङ्गः)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पिता | पितरौ | पितर: |
| द्वितीया | पितरम् | पितरौ | पितृन् |
| तृतीया | पित्रा | पितृभ्याम् | पितृभि: |
| चतुर्थी | पित्रे | पितृभ्याम् | पितृभ्यः |
| पञ्चमी | पितुः | पितृभ्याम् | पितृभ्य: |
| षष्ठी | पितुः | पित्रौः | पितृणाम् |
| सप्तमी | पितरि | पित्रौः | पितृषु |
| सम्बोधन | हे पिताः! | हे पितरौ! | हे पितरः ! |

## ।।विभक्तिश्लोकाः।।

हरिर्हरति पापानि हरिं वन्दे जगद्गुरुम् । हरिणा निहता दुष्टाः हरयेऽस्तु नमोनमः ॥

हरेरेवोत्थितं सर्वं हरेर्भृत्योऽहमस्मि भोः । हरौ स्थितं जगत्सर्वं हरे संरक्ष मां सदा ॥

शंभुर्मारनिवारको विजयते शंभुं त्रिनेत्रं भजे। रुद्राणी खलु शंभुना सुरमिता तस्मै नमश्शंभवे ।

शंभोरुत्थितमस्ति वाङ्मयमिदं शंभोः पदं संश्रये। शंभौ तिष्ठतु मे मनस्त्वविरतं शंभो शिवं प्रापय ॥

पिता देवो वरेण्यः पितरमनुदिनं भावये भक्तिपूर्णः ।
मदीयं जन्म पित्रा गुरुवरपितरे सर्वदा धन्यवादाः ।

पितुः श्रेष्ठोस्ति नान्यो भवतु मम पितुः पादयुग्मे प्रणामम्।
मम प्रीतिर्गरिष्ठा खलु पितरि चिरा हे पितः त्वं महात्मा ॥

जग्मतुः काननं वीरौ भ्रातरौ रामलक्ष्मणौ। अन्विष्यन् भ्रातरौ वीरौ जगाम भरतो वनं ॥

भ्रातृभ्यां सह सीतापि चचार विजने वने । भ्रातृभ्यां शबरी दत्ते मूलानि च फलानि च ॥

भ्रातृभ्यां निर्गता बाणाः रक्षोगणभयङ्कराः । भ्रात्रोः भृत्यं कपिश्रेष्ठं आञ्जनेयं स्मराम्यहं ॥

भ्रात्रोः विभीषणो भक्त्या शरणागतवानभूत् । हे भ्रातरौ युवां शत्रून् हत्वा पालयतं श्रितान्  ॥

## 1.3 सङ्ख्याः 1....100।।

| ० – शून्यम् | दश | विंशतिः | त्रिंशत् |
|---|---|---|---|
| १ - एकः (पुल्लिङ्गः), एका (स्त्रीलिङ्गः) , एकम् (नपुंसकलिङ्गः)। | १ – एकादश | २१ – एकविंशतिः | 31- एकत्रिंशत् |
| २ - द्वौ, द्वे, द्वे। | १२ – द्वादश | २२ – द्वाविंशतिः | 32 द्वात्रिंशत् |
| ३ - त्रयः, तिस्रः, त्रीणि। | १३ – त्रयोदश | २३ – त्रयोविंशतिः | 33 त्रयस्त्रिंशत् |
| ४ –चत्वारः, चतस्रः, चत्वारि। | १४ – चतुर्दश | २४ – चतुर्विंशतिः | 34 चतुस्त्रिंशत् |
| ५ – पञ्च | १५ – पञ्चदश | २५ – पञ्चविंशतिः | 35 पञ्चत्रिंशत् |

| | | | |
|---|---|---|---|
| ६ – षट् | १६ – षोडश | २६ – षड्विंशतिः | 36 षट्त्रिंशत् |
| ७ – सप्त | १७ – सप्तदश | २७ – सप्तविंशतिः | 37 सप्तत्रिंशत् |
| ८ - अष्टः | १८ – अष्टादश | २८ – अष्टाविंशतिः | 38 अष्टात्रिंशत् |
| ९ – नव | १९ - नवदश/ऊनविंशतिः/एकोनविंशतिः | २९ - नवविंशतिः/एकोनत्रिंशत्/ऊनत्रिंशत् | 39 एकोनचत्वारिंशत् |
| १० – दश | २० – विंशतिः | ३० – त्रिंशत् | 40 चत्वारिंशत् |

| | | | | | | |
|---|---|---|---|---|---|---|
| 41 एकचत्वारिंशत् | 51 | एकपञ्चाशत् | 61 | एकषष्ठिः | 70 | सप्ततिः |
| 42 द्विचत्वारिंशत् | 52 | द्विपञ्चाशत् | 62 | द्विषष्ठिः | 71 | एकसप्ततिः |
| 43 त्रिचत्वारिंशत् | 53 | त्रिपञ्चाशत् | 63 | त्रिषष्टिः | 72 | द्विसप्ततिः |
| 44 चतुश्चत्वारिंशत् | 54 | चतुष्पञ्चाशत् | 64 | चतुष्षष्टिः | 73 | त्रिसप्ततिः |
| 45 पञ्चचत्वारिंशत् | 55 | पञ्चपञ्चाशत् | 65 | पञ्चषष्टिः | 74 | चतुस्सप्ततिः |
| 46 षट्चत्वारिंशत् | 56 | षट्पञ्चाशत् | 66 | षट्षष्ठिः | 75 | पञ्चसप्ततिः |
| 47 सप्तचत्वाङ्खरशत् | 57 | सप्तपञ्चाशत् | 67 | सप्तषष्टिॠ | 76 | षट्सप्ततिः |
| 48 अष्टचत्वारिंशत् | 58 | अष्टपञ्चाशत् | 68 | अष्टषष्टिॠ | 77 | सप्तसप्ततिः |
| 49 नवचत्वारिंशत् | 59 | एकोनषष्टिः,नवपञ्चाशत् | 69 | एकोनसप्ततिः | 78 | अष्टसप्ततिः |
| 50 पञ्चाशत् | | ऊनषष्टिः | | ऊनसप्ततिः | 79 | नवसप्ततिः, |
| 50 एकपञ्चाशत्। | 60 | षष्टिः | 70 | सप्ततिः | | एकोनाशीतिः, |
| | | | | | | ऊनाशीतिः |
| | | | | | 80 | अशीतिः |

| | | | | |
|---|---|---|---|---|
| 81 | एकाशीतिः | 91 | एकनवतिः | 100 शतम् |
| 82 | द्व्यशीतिः | 92 | द्विनवतिः | 200 द्विशतम् |

| | | | | |
|---|---|---|---|---|
| 83 | त्र्यशीतिः | 93 | त्रिनवतिः | 300 त्रिशतम् |
| 84 | चतुरशीतिः | 94 | चतुर्नवतिः | 400 चतुश्शतम् |
| 85 | पंचाशीतिः | 95 | पञ्चनवतिः | 500पञ्चशतम् |
| 86 | षडशीतिः | 96 | षण्णवतिः | 600षड्शतम् |
| 87 | सप्ताशीतिः | 97 | सप्तनवतिः | 700सप्तशतम् |
| 88 | अष्टाशीतिः | 98 | अष्टनवतिः, अष्टानवतिः | 800अष्टशतम् |
| 89 | नवाशीतिः,<br><br>एकोननवतिः<br><br>ऊननवतिः | 99 | नवनवतिः, एकोनशतम्, ऊनशतम् | 900नवशतम् |
| 90 | नवतिः | 100 | शतम्, एकशतम् | 1000सहस्रम् |

| | | | | | |
|---|---|---|---|---|---|
| एकम | दवे | त्रीणि | चत्ः | पञ्च | षट् |
| एकादश | दवादश | त्रयोदश | चतुर्दश | पञ्चदश | षोडश |
| एकविंशतिः | दवाविंशतिः | त्रयोविंशतिः | चत्विंशतिः | पञ्चविंशतिः | षड्विंशतिः |
| एकत्रिंशत् | दवात्रिंशत् | त्रयस्त्रिंशत् | चत्स्त्रिंशत् | पञ्चत्रिंशत् | षट्त्रिंशत् |
| एकचत्वारिंशत् | दविचत्वारिंशत् | त्रिचत्वारिंशत् | चतुर्चत्वारिंशत् | पञ्चचत्वारिंशत् | षट्चत्वारिंशत् |
| एकपञ्चाशत् | दविपञ्चाशत् | त्रिपञ्चाशत् | चतुष्पञ्चाशत् | पञ्चपञ्चाशत् | षट्पञ्चाशत् |
| एकषष्टिः | दविषष्टिः | त्रिषष्टिः | चत्◌ःषष्टिः | पञ्चषष्टिः | षट्षष्टिः |
| एकसप्ततिः | दविसप्ततिः | त्रिसप्ततिः | चत्स्प्ततिः | पञ्चसप्ततिः | षट्सप्ततिः |
| एकाशीतिः | दव्यशीतिः | त्र्यशीतिः | चतरशीतिः | पञ्चाशीतिः | षडशीतिः |
| एकनवतिः | दविनवतिः | त्रिनवतिः | चतुर्नवतिः | पञ्चनवतिः | षण्णवतिः |

| | | | |
|---|---|---|---|
| सप्त | अष्ट | नव | |
| सप्तदश | अष्टादश | नवदश | दश |
| सप्तविंशतिः | अष्टाविंशतिः | नवविंशतिः | विंशतिः |
| सप्तस्त्रिंशत् | अष्टात्रिंशत् | नवत्रिंशत् | त्रिंशत् |
| सप्तचत्वारिंशत् | अष्टचत्वारिंशत् | नवचत्वारिंशत् | चत्वारिंशत् |

| | | | |
|---|---|---|---|
| सप्तपञ्चाशत् | अष्टपञ्चाशत् | नवपञ्चाशत् | पञ्चाशत् |
| सप्तषष्टिः | अष्टषष्टिः | नवषष्टिः | षष्टिः |
| सप्तसप्ततिः | अष्टसप्ततिः | नवसप्ततिः | सप्ततिः |
| सप्ताशीतिः | अष्टाशीतिः | नवाशीतिः | अशीतिः |
| सप्तनवतिः | अष्टनवतिः | नवनवतिः | नवतिः |

108- अष्टोत्तरशतम्।

1008- अष्टोत्तरसहस्रम्।

## **1.4** || वचनम् ||

संस्कृते वचनम् तु एकवचनम् द्विवचनम् बहुवचनम् इति त्रिधा भवति। अहं , सः त्वम् इत्यादि एकः एव भवति इत्यतः एकवचनम्। यदि द्वौ स्यात् तर्हि द्विवचनम् आवां यूवाम् तौ इत्यादि। वयम् यूयम् ते इत्यादयः। अत्र उदाहरणवाक्यानि पठन्तु ।

क) एकवचनम् - त्वं लेखं लेखिष्यसि। द्विवचनम् - युवाम् लेखे लेखिष्यथः। बहुवचनम् - यूयम् लेखनि लेखिष्यथ।

(ख) एकवचनम् - अहं वस्त्रं धारिष्यामि। द्विवचनम् - आवां वस्त्रे धारयिष्यावः। बहुवचनम् - वयं वस्त्राणि धारयिष्यामः।

(ग) एकवचनम् - अहं पुस्तकं पठिष्यामि। द्विवचनम् - आवाम् पुस्तके पठिष्यावः। बहुवचनम् - वयम् पुस्तकानि पठिष्यामः।

(घ) एकवचनम् - सा फलं खादिष्यति। द्विवचनम् - ते फले खादिष्यथः। बहुवचनम् - ताः फलानि खादिष्यन्ति।

(ङ) एकवचनम् - मम गृहं सुन्दरम्। द्विवचनम् - आवयोः गृहं सुन्दरम्। बहुवचनम् - अस्माकं गृहं सुन्दरम्।

(च) एकवचनम् - त्वं गमिष्यसि। द्विवचनम् - युवां गमिष्यथः। बहुवचनम् - यूयं गमिष्यथ।

| सः/सा /एषः/ एषा | ते / ताः /एते/एताः | अहम् | वयम् |
|---|---|---|---|
| गमिष्यति | गमिष्यन्ति | गमिष्यामि | गमिष्यामः |
| पठिष्यति | पठिष्यन्ति | पठिष्यामि | पठिष्यामः |
| लेखिष्यति | लेखिष्यन्ति | लेखिष्यामि | लेखिष्यामः |
| करिष्यति | करिष्यन्ति | करिष्यामि | करिष्यामः |
| हसिष्यति | हसिष्यन्ति | हसिष्यामि | हसिष्यामः |
| वक्ष्यति | वक्ष्यन्ति | वक्ष्यामि | वक्ष्यामः |
| नंस्यति | नंस्यन्ति | नंस्यामि | नंस्यामः |
| नेष्यति | नेष्यन्ति | नेष्यामि | नेष्यामः |

| | | | |
|---|---|---|---|
| आगमिष्यति | आगमिष्यन्ति | आगमिष्यामि | आगमिष्यामः |
| पतिष्यति | पतिष्यन्ति | पतिष्यामि | पतिष्यामः |
| क्रीडिष्यति | क्रीडिष्यन्ति | क्रीडिष्यामि | क्रीडिष्यामः |
| पास्यति | पास्यन्ति | पास्यामि | पास्यामः |
| द्रक्ष्यति | द्रक्ष्यन्ति | द्रक्ष्यामि | द्रक्ष्यामः |
| प्रक्ष्यति | प्रक्ष्यन्ति | प्रक्ष्यामि | प्रक्ष्यामः |
| भविष्यति | भविष्यन्ति | भविष्यामि | भविष्यामः |
| मेलिष्यति | मेलिष्यन्ति | मेलिष्यामि | मेलिष्यामः |
| त्यक्ष्यति | त्यक्ष्यन्ति | त्यक्ष्यामि | त्यक्ष्यामः |
| खादिष्यति | खादिष्यन्ति | खादिष्यामि | खादिष्यामः |
| ज्ञास्यति | ज्ञास्यन्ति | ज्ञास्यामि | ज्ञास्यामः |
| शोष्यति | शोष्यन्ति | शोष्यामि | शोष्यामः |
| दास्यति | दास्यन्ति | दास्यामि | दास्यामः |
| प्रेषयिष्यति | प्रेषयिष्यन्ति | प्रेषयिष्यामि | प्रेषयिष्यामः |
| प्रक्षालयिष्यति | प्रक्षालयिष्यन्ति | प्रक्षालयिष्यामि | प्रक्षालयिष्यामः |
| उत्थास्यति | उत्थास्यन्ति | उत्थास्यामि | उत्थास्यामः |
| उपवेक्ष्यति | उपवेक्ष्यन्ति | उपवेक्ष्यामि | उपवेक्ष्यामः |
| स्थापयिष्यति | स्थापयिष्यन्ति | स्थापयिष्यामि | स्थापयिष्यामः |
| स्मरिष्यति | स्मरिष्यन्ति | स्मरिष्यामि | स्मरिष्यामः |

# ।।द्वितीयः पाठः।।

## 2.1 ।। विभक्तयः ।। षष्ठी एवं सप्तमी विभक्तिः।।

सुभाषितानि।

तारााणां भूषणं चन्द्रः, नारीणां भूषणं पतिः।
पृथिव्यां भूषणं राज्ञः विद्या सर्वस्य भूषणम् ॥

The moon is the adornment of the stars; husband is the adornment of woman; the king is the adornment of the earth (country); learning is the adornment of all.

उदारस्य तृणं वित्तं शूरस्य मरणं तृणम् ।
विरक्तस्य तृणं भार्या निस्पृहस्य तृणं जगत् ।। विदुरनीति

For a generous person, wealth is insignificant. For a brave person, death has no value. For a selfless person, his family is insignificant. For a person who has no desires, this world is of no interest.

उदारचित्त वाले व्यक्ति के लिए धन तृण के समान है । शूरवीर के लिए मृत्यु का कोई मतलब नहीं है । वैराग्य लेने वाले व्यक्ति के लिए परिवार का कोई मतलब नहीं है । उदासीन व्यक्ति के लिए इस संसार का कोई मतलब नहीं है ।

तक्षकस्य विषं दन्ते मक्षिकायाः च मस्तके ।
वृश्चिकस्य विषं पुच्छे सर्वांगे दुर्जनस्य तत् ॥

There is poison in the fang of the serpent. There is a poison in the mouth of the fly. There is a poison in the sting of a scorpion; but the wicked man is saturated with the poison.

अभ्यासः।

1. केषां भूषणं चन्द्रः?
2. केषां भूषणम् पतिः?
3. कस्य वित्तं तृणवत् भवति?
4. शूरस्य मरणं भवति?
5. कस्य पुच्छे विषं भवति?

## ।। विनायकदामोदरसावरकरः ।।

आङ्ग्ल-आरक्षकैः ईशवीये १९१० तमे वर्षे जुलै १० दिनाङ्के सूर्योदयसमये फ्रान्स्-देशे मार्सेल्स्- मोरिया नाम्न्यां नौका-कारागारे वीरसावरकरः संस्थापितः । तस्मिन् याने कश्चन यान्त्रिकलोपः सञ्जातः। नौकायाः कर्मकराः तस्य लोपस्य निवारणे मग्नाः अभवन्। यात्रिकाः तु लोपः कदा सम्यग् भविष्यति ? इति प्रतीक्षमाणः आसन्। सागरः अपि प्रशान्तः आसीत् । यात्रिकाः अपि निश्चिन्ताः अभवन्। कश्चन युवा किमपि गणयन् आसीत्। सः बद्धः आसीत् । यतः आङ्ग्लसर्वकारेण वीरसावरकरे राजद्रोहः आरोपितः आसीत्। तस्य चलनवलनं द्वौ आरक्षकौ निर्निमेषं परिशीलयन्तौ आस्ताम्।




सः बद्धः द्वौ आरक्षकौ उद्दिश्य **"**मया बहिः शौचाय गन्तव्यम्**"** इति अपृच्छत् । एकः आरक्षकः तं शौचालयं नीतवान्। सावरकरः अन्तः गत्वा द्वारं पिहितवान्। बहिः द्वौ आरक्षकौ परस्परम् अभिमुखं चलन्तौ रक्षन्तौ आस्ताम्। शौचालयद्वारस्य उपरि काचनिर्मितः गवाक्षः आसीत्। तेन गवाक्षेन अन्तःस्थस्य बद्धस्य चलनं द्रष्टुं शक्यते स्म। अन्तर्गतः बद्धः स्वस्य दीर्घप्रावारकम् अपवृत्य तस्य गवाक्षस्य काचं रोधयन् अवलम्बितवान्। एवम् आरक्षकद्वयस्य दृष्टिपथात् सः अपगतः अभवत्। अन्यस्मिन् क्षणे सः शौचालयस्य रन्ध्रद्वारा समुद्रं प्राप्तवान्। ऊर्मिभिः सह युद्ध्यन् कथञ्चित् तीरं प्रति तरन् गतवान्। नौकाश्रयस्य द्वारतः उपरि अभिप्रसर्प्य पलायनं कृतवान्। अधिककाले गतेऽपि अन्तर्गतः युवा बहिः नागतवानिति हेतोः शौचालयस्य बहिः स्थितस्य आरक्षकद्वयस्य सन्देहः जातः। अन्तः किमपि अभवत् इति सन्देहेन नौकायाः उपरि गत्वा दृष्टवन्तौ। तत्र किमस्ति ..? तदैव बद्धः समुद्रे कूर्दित्वा प्लवमानः पलायते स्म। तत्क्षणे आरक्षकद्वयम् उच्चैः आक्रोशत् " बद्धः पलायते, गृह्णन्तु" इति।

उपर्युक्तघटना वीरसावर्करस्य। एवम् एतादृशानां देशभक्तानां हेतोः भारताय स्वातन्त्र्यम् सम्प्राप्तम्। तस्माद् भवता अपि भारतदेशसेवा करणीया।

प्रश्नाः

1. कस्य उपरि काचनिर्मितः गवाक्षः आसीत्?
2. केन अन्तःस्थस्य बद्धस्य चलनं द्रष्टुं शक्यते स्म?
3. कस्य द्वारतः उपरि अभिप्रसर्प्य पलायनं कृतवान्।

## I. ध्यानेन पठन्तु

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| पुल्लिङ्गः | एतस्य | एतयोः | एतेषाम् |
| स्त्रीलिङ्गः | एतस्याः | एतयोः | एतासाम् |
| नपुंसकलिङ्गः | एतस्य | एतयोः | एतेषाम् |

**II.** अभ्यासः । समुचित पदं षष्ठ्याम् लिखत।


1. **.............................(**एषः) गृहम्।
2. .............................(एतौ) युतकम्।
3. ..............................(एषा)घटी।

| एकवचनम् | बहुवचनम् | एकवचनम् | बहुवचनम् |
|---|---|---|---|
| सः | तस्य | एषः | एतस्य |
| सा | तस्याः | एषा | एतस्याः |
| तत् | तस्य | एतत् | एतस्याः |

| | | | |
|---|---|---|---|
| ते | तेषाम् | एते | एतेषाम् |
| ताः | तासाम् | एताः | एतासाम् |
| तानि | तेषाम् | एतानि | एतेषाम् |

**III.** उदाहरणानुसारं षष्ठ्यन्तरूपाणि लिखन्तु।

उदा- **1.** विश्वामित्रस्य शिष्यः श्रीरामचन्द्रः।



## शेषे षष्ठी

राज्ञः पुरुषः । दशरथस्य पुत्र । वृक्षस्य पर्णम् । षष्ठी शेषे (पा.सू. -२.३.५०) कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः । तत्र षष्ठी स्यात् । अयं भावः-शेषो नाम उक्तादन्यः शेषः । कानि तर्हि उक्तानि ? ककर्तृकरणसम्प्रदानापादानाधिकरणानि उक्तानि । प्रातिपादिकार्थश्च उक्तः । कथम् एषः अर्थः लब्धः ? षष्ठीशेषे (पा.सू. -२.३.५०)इति सूत्रात्पूर्वं "कर्मणि द्वितीया' इत्यारभ्य " प्रतिपादिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा" (पा.सू.-२.३.४६)इत्यन्तं षट् कारकणि प्रातिपदिकार्थश्च अष्टाध्याय्यां पूर्वम् उक्तानि । अतः शेषो नाम उक्तात् अन्यः । कस्तर्हि एतेभ्यः षड्भ्यः कारकेभ्यः प्रातिपदिकार्थाच्च अतिरिक्तः अस्ति ? इति चेत् स्वस्वामिभावः जन्यजनकभावः अवयवावयविभावः इत्यादयः । एवं च कर्मादिकारकेषु द्वितीयादयः प्रवर्तन्ते, प्रातिपदिकार्थे च प्रथमा भवति, स्वस्वामिभावादिसम्बन्धे षष्ठी स्यात् इति पर्यवसन्नः अर्थः । सम्बन्धे षष्ठी इत्यपि कथ्यते। यथा राज्ञः पुरुषः । पुरुषः राज्ञा सम्बन्धः तस्मात् राज्ञः इति षष्ठी प्रयोक्तव्या । दशरथस्य पुत्रः रामः। पुत्रस्य सम्बन्धः दशरथे अस्ति। तस्मात् दशरथस्य इति कथ्यते। वृक्षस्य पर्णम् ।

उदाहरणम् -देवदत्तः मातुः स्मरति । अस्मिन् वाक्ये देवदत्तः कर्ता, माता कर्म भवितुं योग्या । यत्र कर्मत्त्वेन (मातृकर्मकं स्मरणम्) अविवक्षित्वा सम्बन्धसामान्यं (मातृसम्बन्धिस्मरणम्)विवक्ष्यते तत्र षष्ठी स्यात् । अतः अत्र मातृशब्दात् षष्ठी । देवदत्तकर्तृकं मातृसम्बन्धिस्मरणम् इत्यर्थः उपर्युक्तस्य वाक्यस्य । यदि कर्मत्वेन (मातृकर्मकं स्मरणम्) विवक्षा तदा द्वितीया भवेत् एव-देवदत्तः मातरं स्मरति इति । एवं भजे शम्भोश्चरणयोः इति ।

## ।। कारकषष्ठी ।।

कृष्णस्य गमनम् । श्लोकस्य पाठकः । कर्तृकर्मणोः कृतिः (पा.सू. -२.३.६५) कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात् ।

लोकहितं मम (मया) करणीयम् । मम (मया) हरिः सेव्यः । कृत्यानां कर्तरि वा(पा. सू.-२.३.७१)कृत्यप्रत्ययान्तानां योगे कर्तरि षष्ठी वा स्यात् । कृत्प्रत्ययेषु अन्तर्भूताः सप्त कृत्प्रत्ययाः (तव्य, तव्यत्, अनीयर्, यत्, क्यप्, कैलिमर्) सन्ति । एतेषामपि कृत्संज्ञा अस्ति एव । अतः कर्तृ कर्मणोः इति षष्ठी कर्तुः नित्यं प्राप्ता, अनेन विकल्प्यते । षष्ठीपक्षे- लोकहितं मम करणीयम्, मम हरिः सेव्यः इति । षष्ठ्यभावपक्षे – कर्तृकरणयोस्तृतीया (पा.सू. २.३.१८) इति कर्तरि तृतीया भवति –लोकहितं मया करणीयम्' मया हरिः सेव्यः इति ।

**उपपदषष्ठी -** चन्द्रस्य (चन्द्रेण) सदृशं मुखम् । अस्मिन् वाक्ये मुखं चन्द्रस्य सम्बन्धः। तस्मात् चन्द्रशब्दस्य षष्ठी विभक्तिः। बलरामस्य (बलरामेण) तुल्यः (सदृशः) भीमः । तुल्यार्थैररुलोपमाभ्यां तृतीयान्यतरस्याम् (पा.सू.२.३.७२) तुल्यार्थैः योगे तृतीया वा स्यात् पक्षे षष्ठी । षष्ठीपक्षे चन्द्रस्य सदृशं मुखम् षष्ठयभावे तृतीया भवति चन्द्रेण सदृशं मुखम् इति ।

- ⇒ गृहस्य (गृहाद्) दूरं विद्यालयः ।
- ⇒ विद्यालयस्य (विद्यालयात्) निकटम् आपणः ।
- ⇒ दूरान्तिकार्थैः षष्ठी अन्यतरस्याम् (पा.सू.- २.२.३४) दूरान्तिकार्थैः शब्दैः योगे षष्ठी स्यात् पञ्चमी च । यथा
  प्राणिनां (प्राणिषु) मानवः श्रेष्ठः ।
- ⇒ गवां (गोषु कपिला बहुक्षीरा ।
- ⇒ अध्वगानां (अध्वगेषु) धावन् शीघ्रतमः । छात्रेणां (छात्रेषु) श्यामः पटुः । इत्येवं षष्ठ्यां प्रयोगाः वर्तन्ते।

## षष्ठी - विभक्तिः

| | |
|---|---|
| तुल्यः | रामः पितुः तुल्यः आसीत् |
| अधि-ई | बालकः मातुः अध्येति |
| दया | रामः भरतस्य दयते |
| प्र-भू | अहम् आत्मनि प्रभवामि |
| सदृशः | मोहनः जनकस्य सदृशः अस्ति |

## सप्तमी - विभक्तिः

| | | | |
|---|---|---|---|
| आधारे | अध्यापकः श्यामफलके लिखति | निर्धारणे | रमा सर्वासु छात्रासु सुन्दरतमा |
| स्निह् | पिता पुत्रे स्निह्यति | अनु-रज् | प्रजाः नृपे अनुरज्यन्ते |
| गृह् | नारीं केशेषु गृहित्वा कर्षति | ह (हन्) | त्वं निरपराधे जने कथं प्रहसि |
| बध् | सः धेनुं वृक्षस्य मूले बध्नाति | विश्वस् | दुर्जनेषु कः विश्वसिति |
| क्षिप् | व्याधः मृगे इषून् क्षिपति | मुच् | रामः राक्षसेषु शरान् अमुञ्चत् |
| कुशलः | रामः गणिते कुशलः अस्ति | निपुणः | रमेशः मृदङ्गवादने निपुणः |
| दक्षः | बालकः अध्ययने दक्षः | पण्डितः | सोहनः नीतिशास्त्रेपण्डितः |

# षष्ठी - विभक्तिः



सम्बन्धे
एतत् रामस्य
पुस्तकम् अस्ति
तुल्यः
रामः पितुः तुल्यः
आसीत्
षष्ठी -
विभक्तिः
स्मृ
पत्नी पत्युः स्मरति
ईशः
ब्रह्मा संसारस्य
ईशः
अधि-ई
बालकः मातुः
अध्येति
सदृशः
मोहनः जनकस्य
सदृशः अस्ति
षष्ठी -
विभक्तिः
दया
रामः भरतस्य
दयते
प्र-भू
अहम् आत्मनि
प्रभवामि

आ कारान्त बालस्य बालयोः बालानाम्

इ कारान्तपुल्लिङ्गः हरिः हर्योः हरीणाम्

म् नपुंसकलिङ्गः फलम् शब्दः फलस्य फलयोः फलानाम्

आकारान्त स्त्री सीतायाः सीतायोः सीतानाम्

ईकारान्त स्त्री तिथेः तिथ्योः तिथीनाम्

कस्य कयोः केषाम् कस्य कयोः केषाम् कस्याः कयोः कासाम्

तस्य तयोः तेषाम् तस्य तयोः तेषाम् तस्याः तयोः तासाम्

एतस्य एतयोः एतेषाम् एतस्य एतयोः एतेषाम् एतस्याः एतयोः एतासाम्

भवतः भवतोः भवताम् भवत्याः भवत्योः भवतीनाम्

## ।। संस्कृतभाषा ।।

संस्कृतं भारतस्य प्राचीनतमा भाषा अस्ति। 'एषा देवभाषा इति लोके प्रसिद्धिः। सा च प्रसिद्धिः निर्मूला नास्ति। अस्याः भाषायाः व्याकरणं वैज्ञानिकम् अस्ति। इयं भाषा वेदोपनिषच्छास्त्राणां भाषा अस्ति। इयम् एव भाषा पुराणानां दर्शनानां च भाषा अस्ति।

संस्कृतभाषा अतीव मधुरा अस्ति। अस्माकं भारतीयपरम्परायाः सभ्यतायाः च रक्षणम् अपि संस्कृतभाषया एव भवति। संस्कृति-संस्कृतयोः विशेषः सम्बन्धः अस्ति। "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिः तथा।" इति सुभाषितं प्रसिद्धम् अस्ति। प्रतिवर्षम् श्रावणमासस्य पूर्णिमा तिथिः संस्कृतदिनत्वेन आचर्यते।

महाभारतरामायणयोः कथा अपि संस्कृतेन लिखिता अस्ति। भास-श्रीहर्ष-कालिदासादीनां भाषा अपि संस्कृतम् आसीत्। वेदोपनिषदादयः संस्कृते सन्ति। अद्वितीय भगवद्गीता अपि संस्कृते एव अस्ति। अनेकानि दर्शनानि शास्त्राणि च संस्कृते एव सन्ति। भारतीयचिन्तनस्य सारः एव संस्कृते अस्ति। अतः संस्कृतं संस्कृतिभाषा अस्ति।

**I.** रिक्तस्थानम् उचितेन विभक्तिरूपेण पूरयन्तु।

1. संस्कृतं ..............................प्राचीनतमा भाषा अस्ति।(भारतम्)
2. संस्कृतम् ............................ भाषा अस्ति।(वेदोपनिषत् शास्त्राणि)
3. संस्कृतं ................................भाषा अस्ति। (पुराणानि दर्शनानि च।)

**II.** रिक्तस्थानं संस्कृतम् इत्येतस्य उचितेन विभक्तिरूपेण पूरयन्तु।

1. रामायणकथा ...........................रचिता अस्ति।
2. वेदोपनिषदादयः ......................सन्ति।
3. भारतीयभाषाः...........................समुत्पन्नाः।

## ।। सप्तमीविभक्तिः ।।

कारकसप्तमी, उपपदसप्तमी, चेति सप्तमी द्विधा । अधिकरणसंज्ञां पुरस्कृत्य प्रवर्तमाना सप्तमी कारकसप्तमी । अधिकरणसंज्ञा च एकेनैव सूत्रेण विहिता । आधारोधिकरणम्। यत्र आधारः तत्र अधिकरणसंज्ञा भवति। यत्र अधिकरणसंज्ञा भवति तत्र सप्तमी विभक्तिः भवति। यदा अधिकरणसंज्ञा प्रवृत्ता भवति तदा 'सप्तम्यधिकरणे च -२.३.३६' (अधिकरणे सप्तमी स्यात् । चकाराद्दूरान्तिकार्थेभ्यः। ) इति सूत्रेण सप्तमी प्रवर्तते ।

गृहे बालकः अस्ति। गृहं बालकस्य आधारः गृहम् । तस्मात् गृहे इति सप्तमी विभक्तिः भवति।

बहुभिः सूत्रैः वार्तिकैः च उपपदसप्तमी विहिता । कर्मप्रवचनीयसंज्ञां पुरस्कृत्य सप्तमी तु एकेनैव सूत्रेण विहिता ।

१. बालः कटे उपविशति । पाचकः स्थाल्याम् ओदनं पचति । तस्य पठने इच्छा अस्ति । तिलेषु तैलम् अस्ति । आधारोऽधिकरणम् -१.४.४५ कर्तृकर्मद्वारा तन्निष्ठाक्रियायाः आधारः कारकम् अधिकरणसंज्ञः स्यात् । (अष्टमं (८) पृष्ठं पश्यन्तु। आधारस्त्रिधा –

1. औपश्लेषिकसप्तमी ।
2. वैषयिकसप्तमी ।
3. अभिव्यापकसप्तमी ।



आधारे
अध्यापकः श्यामफलके लिखति
स्निह्
पिता पुत्रे स्निह्यति
सप्तमी विभक्तिः
गाह्
नार्यः गङ्गायां अवगाहन्ते
बध्
सः धेनुं वृक्षस्य मूले बध्नाति
क्षिप्
व्याधः मृगे इषून् क्षिपति
कुशलः
रामः गणिते कुशलः अस्ति
दक्षः
बालकः अध्ययने दक्षः
निर्धारणे
रमा सर्वासु छात्रासु सुन्दरतमा
अनु-रञ्ज्
प्रजाः नृपे अनुरज्यन्ते
सप्तमी विभक्तिः
हस्
त्वं निरपराधे जने कथं प्रहससि
विश्वस्
दुर्जनेषु कः विश्वसिति
मुच्
रामः राक्षसेषु शरान् अमुञ्चत्
निपुणः
रमेशः मृदङ्गवादने निपुणः
पण्डितः
मोहनः नीतिशास्त्रे पण्डितः

## 2.2 क्रियापदानि ।।

| वर्तमाने | भविष्यकाले | निर्देशनम् | भूतकाले | क्त्वा प्रत्ययः | तुमन् प्रत्ययः |
|---|---|---|---|---|---|
| गच्छति | गमिष्यति | गच्छत् | गतवान् / गतवती | गत्वा | गन्तुम् |
| पठति | पठिष्यति | पठत् | पठितवान् /पठितवती | पठित्वा | पठितुम् |
| लिखति | लेखिष्यति | लिखत् | लेखितवान् /लेखितवती | लेखित्वा | लेखितुम् |
| करोति | करिष्यति | करोत् | कृतवान् /कृतवती | कृत्वा | कर्तुम् |
| हसति | हसिष्यति | हसत् | हसितवान् /हसितवती | हसित्वा | हसितुम् |
| वदति | वक्ष्यति | वदत् | उक्तवान् /उक्तवती | उक्त्वा | वक्तुम् |
| नमति | नंस्यति | नमत् | नमितवान् /नमितवती | नत्वा | नमितुम् |
| नयति | नेष्यति | नयत् | नीतवान् /नीतवती | नीत्वा | नेतुम् |
| आगच्छति | आगमिष्यति | आगच्छत् | आगतवान्/ आगतवती | आगत्य | आगन्तुम् |
| पतति | पतिष्यति | पतत् | पतितवान् /पतितवती | पतित्वा | पतितुम् |
| क्रीडति | क्रीडिष्यति | क्रीडत् | क्रीडितवान् /क्रीडितवान् | क्रीडित्वा | क्रीडितुम् |
| पिबति | पास्यति | पिबत् | पीतवान्/पीतवती | पीत्वा | पातुम् |
| पश्यति | द्रक्ष्यति | पश्यत् | दृष्टवान्/दृष्टवती | दृष्ट्वा | द्रष्टुम् |
| पृच्छति | प्रक्ष्यति | पृच्छत् | पृष्टवान्/पृष्टवती | पृष्ट्वा | प्रष्टुम् |
| भवति | भविष्यति | भवत् | अभवत् | भूत्वा | भवितुम् |
| मिलति | मेलिष्यति | मिलत् | मिलितवान्/मिलितवती | मिलित्वा | मेलितुम् |
| त्यजति | त्यक्ष्यति | त्यजत् | त्यक्तवान्/त्यक्तवती | त्यक्त्वा | त्यक्तुम् |
| खादति | खादिष्यति | खादत् | खादितवान्/खादितवती | खादित्वा | खादितुम् |
| जानाति | ज्ञास्यति | जानात् | ज्ञातवान्/ज्ञातवती | ज्ञात्वा | ज्ञातुम् |
| शृणोति | श्रोष्यति | शृणोत् | श्रुतवान्/श्रुतवती | श्रुत्वा | श्रोतुम् |
| ददाति | दास्यति | ददात् | दत्तवान्/दत्तवती | दत्वा | दातुम् |
| प्रेषयति | प्रेषयिष्यति | प्रेषयत् | प्रेषितवान्/प्रेषितवती | प्रेषयित्वा | प्रेषयितुम् |
| प्रक्षालयति | प्रक्षालयिष्यति | प्रक्षालयत् | प्रक्षालितवान्/प्रक्षालितवती | प्रक्षाल्य | प्रक्षालयितुम् |
| उत्तिष्ठति | उत्थास्यति | उत्तिष्ठत् | उत्थितवान्/उत्थितवती | उत्थाय | उत्थातुम् |

| | | | | | |
|---|---|---|---|---|---|
| उपविशति | उपवेक्ष्यति | उपविशत् | उपविष्टवान्/उफविष्टवती | उपविश्य | उपवेष्ट्म् |
| स्थापयति | स्थापयिष्यति | स्थापयत् | स्थापितवान्/स्थापितवती | स्थापयित्वा | स्थापयित्म् |
| स्मरति | स्मरिष्यति | स्मरत् | स्मृतवान्/स्मृतवती | स्मृत्वा | स्मर्त्म् |

## II.3 स्त्रीलिङ्गशब्दाः।।

संस्कृतभाषायां पुल्लिङ्गपादनि स्त्रीलिङ्गपदानि नपुंसकलिङ्गपदानि चेति त्रिधा भवन्ति। अन्तिमः अक्षरः यत्र दीर्घवर्णः स्यात् सामान्यतया स्त्रीलिङ्गपदानि भवन्ति। उदाहरणार्थम् - छात्रा, लता, प्रयोगशाला, लेखिका, शिक्षिका, पेटिका, माला, सेविका, नौका, छुरिका, कालिका, गायिका, अग्निपेटिका, मापिका, वीणा, उत्पीठिका, सूचिका, कुञ्चिका, पिपीलिका, उत्पिठिका, मक्षिका इत्यादि।

रमारुचिरनदी धेनुर्वाग्धिः सरिदनन्तरम्।
क्षुत् प्रावृट् च शरच्चैव दशैताः स्त्रीषु नायिकाः।।

- अ कारान्तः स्त्रीलिङ्गः रमाशब्दः।
- इ कारान्तः स्त्री लिङ्गः रुचिशब्दः।
- ई कारान्तः स्त्री लिङ्गः नदीशब्दः।
- उ कारान्तः स्त्री लिङ्गः धेनुशब्दः।
- ऊकारान्तः स्त्री लिङ्गः वधूशब्दः।
- च कारान्तः स्त्री लिङ्गः वच् शब्दः।
- ई कारान्तः स्त्री लिङ्गःधी शब्दः।
- त कारान्तः स्त्री लिङ्गः हरित् शब्दः।
- ध् कारान्तः स्त्री लिङ्गः क्षुध् शब्दः।
- ष् कारान्तः स्त्री लिङ्गः प्वावृष् शब्दः।
- द कारान्तः स्त्री लिङ्गः शरद् शब्दः।

एतेषां समयानुसारं पठन्तु।

### रमा(स्त्रीलिङ्गः)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | रमा | रमे | रमाः |
| द्वितीया | रमाम् | रमे | रमाः |
| तृतीया | रमया | रमाभ्याम् | रमाभिः |
| चतुर्थी | रमायै | रमाभ्याम् | रमाभ्यः |
| पञ्चमी | रमायाः | रमाभ्याम् | रमाभ्यः |
| षष्ठी | रमायाः | रमयोः | रमाणाम् |
| सप्तमी | रमायाम् | रमयोः | रमासु |
| सम्बोधन | हे रमे! | हे रमे! | हे रमाः! |

### लता(स्त्रीलिङ्गः)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|

| | | | |
|---|---|---|---|
| प्रथमा | लता | लते | लताः |
| द्वितीया | लताम् | लते | लताः |
| तृतीया | लतया | लताभ्याम् | लताभिः |
| चतुर्थी | लतायै | लताभ्याम् | लताभ्यः |
| पंचमी | लतायाः | लतयोः | लताभ्यः |
| षष्ठी | लतायाः | लतयोः | लतानाम् |
| सप्तमी | लतायाम् | लतयोः | लतासु |
| सम्बोधन | हे लते! | हे लते! | हे लताः! |

### नदी (ईकारान्त स्त्रीलिङ्गः)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | नदी | नद्यौ | नद्यः |
| द्वितीया | नदीम् | नद्यौ | नदीः |
| तृतीया | नद्या | नदीभ्याम् | नदीभिः |
| चतुर्थी | नद्यै | नदीभ्याम् | नदीभ्यः |
| पंचमी | नद्याः | नदीभ्याम् | नदीभ्यः |
| षष्ठी | नद्याः | नद्योः | नदीनाम् |
| सप्तमी | नद्याम् | नद्योः | नदीषु |
| सम्बोधनप्रथमा | हे नदि! | हे नद्यौ! | हे नद्यः! |

### मातृ(ऋकारान्त स्त्रीलिङ्गः)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | माता | मातरौ | मातरः |
| द्वितीया | मातरम् | मातरौ | मातृः |
| तृतीया | मात्रा | मातृभ्याम् | मातृभिः |
| चतुर्थी | मात्रे | मातृभ्याम् | मातृभ्यः |
| पञ्चमी | मातुः | मातृभ्याम् | मातृभ्यः |
| षष्ठी | मातुः | मात्रोः | मातृणाम् |
| सप्तमी | मातरि | मात्रोः | मातृषु |
| सम्बोधनप्रथमा | हे मातः! | हे मातरौ! | हे मातरः! |

## ।।स्त्रीलिङ्गे सप्तविभक्तिषु क्रियाः।।

लकारेषु स्त्रीलिङ्गपदानां सामान्यतया पुल्लिङ्गवद् एव उपयोगः क्रियते। उदा -बालिका गच्छति । बालिके गच्छतः। बालिकाः गच्छन्ति। त्वं गच्छसि युवां गच्छतः यूयं गच्छथः यूयं गच्छथ। अहं गच्छामि आवां गच्छावः वयं गच्छामः।

स्त्रीलिङ्गे सम्बोधनावसरे हे भवति इति उपयोगः करणीयः। उदा-हे भवति गच्छतु, हे भवति पठतु इत्यादि। बहुवचने भवत्यः इति प्रयुज्यते। यथा भवत्यः पठन्तु। सङ्ख्यायाः स्त्रीलिङ्गशब्दानि सन्ति। यथा - एका बालिका, द्वे बालिके, तिस्रः बालिकाः, चतस्रः बालिकाः। परन्तु पञ्च प्रभृति सामान्यं वर्तते।

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | भवती | भवत्यौ | भवत्यः |
| द्वितीया | भवतीम् | भवत्यौ | भवतीः |
| तृतीया | भवत्या | भवद्भ्याम् | भवद्भिः |
| चर्तुथी | भवत्यै | भवद्भ्याम् | भवद्भ्यः |
| पञ्चमी | भवत्याः | भवद्भ्याम् | भवद्भ्यः |

| | | | |
|---|---|---|---|
| षष्ठी | भवत्याः | भवत्योः | भवतीनाम् |
| सप्तमी | भवत्याम् | भवत्योः | भवतीषु |
| सम्बोधन | हे भवति ! | हे भवत्यौ ! | हे भवत्यः ! |

अधो लिखितानि वाक्यानि पठित्वा जानातु।

1) भवती लिखतु।
2) अहं भवतीं पाठयामि।
3) भवत्या विद्यालयं कुत्र?
4) भवत्यै पुस्तकं ददामि।
5) भवत्याः गृहात् विद्यालयः कियत् दूरे अस्ति?
6) भवत्याः भ्रातुः नाम किम्?
7) भवत्याम् ज्ञानम् अस्ति।

## 2.4 ।। पठनम् ।।

उच्चारणे माधुर्यं स्पष्टता पदच्छेदः स्वरेण सहितं धैर्यं लयं सामर्थ्यं च स्यात् इति । स च श्लोकः एवम् अस्ति। यथा-

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः | धैर्यं लयसमर्थं च षडेते पाठका गुणाः ||

पाठकाधमाः एवं भवन्ति। गीती शीघ्री अर्थात् यः शीघ्रं पठति, पुनः पठनकाले शिरः वृथा कंपति अनर्थज्ञः अल्पस्वरेण पठति एते षड्दोषाः भवन्ति। पाणिनीय शिक्षायाम् एवम् उल्लिखितम् अस्ति।

गीती शीघ्री शिरः कम्पी तथा लिखित पाठकः ।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ॥

----------------पाणिनीयशिक्षा

शिक्षां व्याख्यास्यामः ॥ वर्णः, मात्रा, बलं, साम, सन्तानः, इत्युक्तः शिक्षाध्याये'॥

उपनिषदानुसारेण इत्येतानि षडङ्गानि भवन्ति शिक्षाविषयस्येति।

(१) वर्णस्य अभिप्रायः अक्षराणि भवन्ति । वेदतत्त्वस्य ज्ञानार्थं संस्कृतवर्णमालायाः ज्ञानं नितान्तम् आवश्यकमस्ति । पाणिनीयशिक्षातः ज्ञानं भवति यत्, संस्कृतवर्णमालायां ६३ अथवा ६४ वर्णाः निर्धारिताः भवन्ति । न केवलमियं संख्या संस्कृतभाषार्थमेव, प्रत्युत वैदिककाले प्रयुक्तं प्राकृतभाषार्थमपि नियता आसीत्।

(२) स्वरस्याभिप्रायः - उदात्तानुदात्तस्वरितैः सहास्ति ।

(३) मात्राशब्देन उच्चारणसापेक्षसमय एवास्ति । मात्रा त्रिधा भवति - ह्रस्व-दीर्घ-प्लुताश्चेति । एकमात्रो भवेद् ह्रस्वः, द्विमात्रो दीर्घ उच्यते, तथा त्रिमात्रो प्लुतसंज्ञको भवति ।

(४) बलेन स्थानप्रयत्नयोः बाधो भवति । स्वर-व्यञ्जनयोः उच्चारणकाले ताल्वादि यत्स्थानस्य वायुना स्पर्शो भवति, तदैव स्थानमिति । स्थानानि च इमानि अष्टसंख्यकानि भवन्ति । प्रयत्नोऽपि द्विविधा भवति- आभ्यन्तरो बाह्यश्चेति । अभ्यन्तरप्रयत्नः चतुर्धा विभक्तोऽस्ति - स्पृष्ट-ईषत्स्पृष्ट-विवृत-संवृतभेदात् । बाह्यप्रयत्नोऽपि एकादशधा - विवार-संवार-श्वास-नाद-घोष-अघोष-अल्पप्राण-महाप्राण-उदात्तस्वरिताश्चेति ।

(५) सामशब्दस्यार्थो भवति — 'साम्यम्' अर्थात् दोषरहितम् अनुदात्त-माधुर्यादिगुणयुक्तमुच्चारणम् । तद्यथा -

'माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः। धैर्यं लयसमर्थञ्च षडेते पाठका गुणाः।।'

विपरीतमस्य अधमपाठकेषु परिगणितप्रकाराणां निर्देशोऽपि तत्रैव । यथा -

‘गीती शीघ्री शिरः कम्पी यथा लिखितपाठकः॥ अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाऽधमाः॥

शङ्कितंभीतादिपाठोऽपि अनर्थको भवति। यथा -

'शङ्कितं भीतमुत्कृष्टमव्यक्तमनुनासिकम्। काकस्वरं शिरसिंगं तथा स्थानविवर्जितम्।।
उपांशुदष्टं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रगीतम्। निष्पीडितं ग्रस्तपदाक्षरश्च वदेन्न दीनं न तु सानुनास्यम्।।

## ।। प्रबन्धलेखनम् ।।

लेखने लेखननियमाः सन्ति। संस्कृते प्राचीनकाले विरामचिह्नम् (comma) अर्धविरामादयो चिह्नानि न उपयुज्यन्ते स्म। परन्तु अद्यत्वे उपयोगं कुर्मः। पूर्णविरामचिह्नम् “।“ , अर्धविरामचिह्नम् “;”। संस्कृतभाषायाम् इति शब्दः पूर्णविरामस्थाने उपयुज्यमानः आसीत्। क्वचित् स्थलेषु सम्पूर्णम् अलम् शम् इत्यादयः शब्दाः अपि दृश्यन्ते। समासभरितानां लेखनम् श्रेष्ठं मन्यते।

# ।।तृतीयः पाठः।।

## 3.0 ।। नपुंसकलिङ्गशब्दाः।।

संस्कृतभाषायां पुल्लिङ्गपदनि स्त्रीलिङ्गपदानि नपुंसकलिङ्गपदानि भवन्ति। अन्तिमःवर्णः यत्र अनुस्वारवर्णः स्यात् सामान्यतया नपुंसकलिङ्गपदानि भवन्ति। उदा फलम् , पुष्पम् , यानम्, आम्रम् एतानि नपुंसकलिङ्गपदानि सन्ति। नपुंसकलिङ्गशब्दानां परिचार्थम् इमं श्लोकं पठन्तु।

ज्ञानं दधी पयो वर्म धनुर्वारि जगत् तथा।।

मधु नाम मनोहारिदशैतानि नपुंसके।।

- अ कारान्तः नपुंसकलिङ्गः फलशब्दः।
- इ कारान्तः नपुंसकलिङ्गः दधिशब्दः।
- स कारान्तः नपुंसकलिङ्गः पयस् शब्दः।
- न कारान्तः नपुंसकलिङ्गः वर्मन् शब्दः।
- स कारान्तः नपुंसकलिङ्गः धनुस् शब्दः।
- इ कारान्तः नपुंसकलिङ्गः वारि शब्दः।
- त कारान्तः नपुंसकलिङ्गः जगत् शब्दः।
- उ कारान्तः नपुंसकलिङ्गः मधु शब्दः।
- न कारान्तः नपुंसकलिङ्गः नामन् शब्दः।
- इन् अन्त नपुंसकलिङ्गः वाग्मिन् शब्दः।
- द कारान्तः स्त्री लिङ्गः शरद् शब्दः।

### 3.1 ।। अव्ययानाम् उपयोगः।।

येषां पदानां लिङ्ग-विभक्ति-वचननिमित्तको रूपभेदो नास्ति तानि अव्ययानि इत्युच्यन्ते। संस्कृतभाषायाम् अव्ययानि नितरां प्राधान्यं भजन्ते। यथा प्रायः सर्वेपि शब्दाःतत्तद्विभक्त्यनुगुणं,तत्तत्पुरुषानुगुणं,तत्तद्वचनानुगुणं वा परिवर्तन्ते तथा एतानि अव्ययानि न परिवर्तन्ते। तन्नाम सर्वेषु वचनेषु,सर्वेषु पुरुषेषु,सर्वासु विभक्तिषु च एतेषाम् अव्ययानां रूपं समानं भवति। तदेव उच्यते-

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु । वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥ इति

यत् सर्वेषु लिङ्गेषु सर्वसु विभक्तिषु सर्वेषु वचनेषु न परिवर्तते तत् अव्ययम् ।

**कानिचन अव्ययानि ।** संस्कृतभाषायाम् अव्ययानि बहूनि सन्ति। अत्र कतिपयाव्ययानि एव दर्शितानि। तानि -

---

अथ,अपि,अलम्, इति,इव, उच्चैः, एव, कदा, कुतः, क्व, खलु, चित, चेत, तूष्णीम, नूनम, पुरा, मा, मिथ्या, इतस्ततः, अत्र तत्र, यथा तथा, यदा तदा, यद्यपि, यदि तर्हि, यावत, वरम् वा विना सहसा हि ह्यः।

| अव्ययम् | | अर्थः | उदाहरणम् |
|---|---|---|---|
| 1. | अपि | 1. 'भी' इति भाषायाम्, एवम्, पुनः | अहमपि ग्रामं गच्छामि। |
| | | 2. एतदतिरिक्तम् | अस्ति मे सोदरस्नेहोऽप्येतेषु। |
| | | 3. वाक्यारम्भे प्रश्नवाचकः | अपि सन्निहितोऽत्र कुलपतिः? |
| 2. | इति | 1. शब्दस्वरद्योतकः | कूजन्तं राम रामेति मधुरं मधुराक्षरम्। |
| | | 2. कारणद्योत्यार्थे (क्योंकि) | वैदेशिकोऽस्मीति पृच्छामि। पुराणमित्येव न साधु सर्वम्। |
| | | 3. प्रातिपदिकार्थद्योतकः | दिलीप इति राजेन्दुः। अवैमि चैनामनघेति। |
| | | 4. उपसंहारार्थे | इति द्वितीयोऽध्यायः। इति प्रथमोऽङ्कः। |
| 3. | इव | 1. उपमार्थकः | वागर्थाविव संपृक्तौ। |
| | | 2. उत्प्रेक्षार्थकः | पश्यामीव पिनाकिनम्। लिम्पतीव तमोऽङ्गानि। |
| 4. | उच्चैः | महत्यर्थे | उच्चैः पर्वताः सन्ति। विपदि उच्चैः स्थेयम्। |

| | | | |
|---|---|---|---|
| | | | सः गायकः उच्चैः गायति।<br>उच्चैर्विर्हस्य। |
| 5. | नूनम् | असंदिग्धरूपेण<br>निश्चयमेव | नूनम् त्वया तत्र गन्तव्यम्।<br>नूनं सः सत्यं वदति। |
| 6. | पुरा | पूर्वकाले | पुरा शुक्रमुपस्थाय।<br>पुरा पाटिलिपुत्रनगरे नन्दः नाम राजा आसीत्। |
| 7. | मा | निषेधे | पापे रतिं मा कृथाः<br>क्लैब्यं मा स्म गमः पार्थ!। |
| 8. | सहसा | विचारं विनैव<br>अकस्मात् | सहसा विदधीत न क्रियाम्।<br>अतिथिः सहसा एव गृहमागच्छत्। |
| 9. | बहिः | बाह्यतः, 'बाहर' इति भाषायाम् | ग्रामाद् बहिरुद्यानमस्ति।<br>सः गृहाद् बहिः भ्रमति। |
| 10. | शनैः | मन्दगत्या | सः शनैश्चलितः। |
| 11. | कदा | कस्मिन् समये, 'कब' इति भाषायाम् | सः कदा विद्यालयं गच्छति? |
| 12. | कुतः | कस्मात् स्थानात्<br>'कहाँ से' इति भाषायाम् | कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्?<br>कुतः समायातो योगी? |
| 13. | इतस्ततः | 'इधर-उधर' इति भाषायाम्<br>व्यर्थम् | विलुप्तो बालः इतस्ततः कुत्रापि न प्राप्तः। सः इतस्ततः भ्रमति समयं च यापयति। |
| 14. | अत्र | अस्मिन् स्थले<br>'यहाँ' इति भाषायाम् | सः अत्र निवसति।<br>यत्ने कृते यदि न सिध्यति कोऽत्र दोषः। |

| | | | |
|---|---|---|---|
| 15. | तत्र | तस्मिन् स्थले<br>'वहाँ' इति भाषायाम् | सः जयपुरे पठति, तत्र एव निवसति। |
| | | कारणार्थे (हेत्वर्थे) | निरीतयः यन्मदीयाः प्रजाः।<br>तत्र हेतुस्त्वद् ब्रह्मवर्चसम्॥ |
| | | आदरार्थे | तत्र भवान् काश्यपः। |
| 16. | इदानीम् | अधुना, सम्प्रति | दयालः इदानीं क्रीडति। वत्से प्रतिष्ठस्वेदानीम्! |
| 17. | सम्प्रति | अधुना, इदानीम् | सम्प्रति, गम्यतां विद्यालयम्।<br>अयि! सम्प्रति देहि दर्शनम्। |
| 18. | यदा | यस्मिन् काले | यदा सूर्योदयो भवति, सः पाठं पठति। |

| | | | |
|---|---|---|---|
| | | 'जब' इति भाषायाम् | पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किम्। |
| 19. | कदा | कस्मिन् काले<br>'कब' इति भाषायाम् | कदा गमिष्यसि? एष गच्छामि। |
| 20. | यथा | येन प्रकारेण | सः यथा वदति तथैव करोति।<br>यथा देवदत्तः तथा विष्णुदत्तः अस्ति। |
| 21. | तथा | तेन प्रकारेण | सः तथा कार्यं करोति।<br>सः यथा वदति तथा करोति। |
| 22. | विनाः | विहीनः<br>अभावः | ज्ञानं विना न मुक्तिः।<br>यथा तानं विना रागो, यथा मानं विना नृपः।<br>यथा दानं विना हस्ती, तथा ज्ञानं विना यतिः॥ |
| 23. | श्वः | आगामि दिवसः | अहं श्वः जयपुरं गमिष्यामि।<br>वरमद्य कपोतो न श्वो मयूरः। |
| 24. | ह्यः | गते अहनि<br>व्यतीतः दिवसः | अहं ह्यः भरतपुरम् अगच्छम्।<br>सः ह्यः पाठम् अपठत्। |
| 25. | अधुना | इदानीम्, सम्प्रति, अस्मिन् काले | अधुना बालाः पठन्ति। |
| 26. | कदापि | 'कभी' इति भाषायाम् | कदापि अधर्मं न आचरेत्।<br>सः कदापि न रोदिति। |
| 27. | किम् | दोषार्थकः निन्दार्थे वा | हितान्न यः संशृणुते स किं प्रभुः, स किं सखा साधु न शास्ति योऽधिपम्।<br>सः किं पठति। (अनध्यायप्रियः इति) |
| 28. | यत् | येन केन प्रकारेण<br>यद्यपि<br>'क्योंकि' इति भाषायम् | यत् किञ्चिदेतत्।<br>वक्रः पन्था यदपि भवतः......।<br>रामोऽवदत् यत् सः सर्वम् अपश्यत्।<br>रामः सत्यं वदति यत् सः सर्वम् अपश्यत्। |

## 3.2 ।। लेखनकौशलम् ।।

## स्वरे परे

१ माता अनुजं आहूतवती । २ गिरीशः मधुरं इच्छति । ३ ललिता कारणं ऊहते ।

उपरितनेषु वाक्येषु अनुस्वारः यः लिखितः सः दोषाय ।

प्रथमवाक्ये 'अनुज'शब्दे जकारोत्तरम् अनुस्वारः लिखितः अस्ति । तस्य पुरतः 'आ'कारः अस्ति ।
द्वितीयवाक्ये 'मधुर'शब्दे रकारोत्तरम् अनुस्वारः लिखितः । तस्य पुरतः 'इ'कारः अस्ति ।
तृतीयवाक्ये 'कारण'शब्दे णकारोत्तरम् अनुस्वारः लिखितः । तस्य पुरतः 'इ'कारः अस्ति ।

नियमः - अनुस्वारात् स्वरे परे मकारः एव लेखनीयः, न तु अनुस्वारः ।

अतः तानि वाक्यानि एवं लेखनीयानि ।

१ माता अनुजम् आहूतवती । २ गिरीशः मधुरम् इच्छति । ३ ललिता कारणम् ऊहते ।

## व्यञ्जने परे

१ शिशुः कन्दुकम् नयति । २ नव्या शाटिकाम् पश्यति । ३ विक्रमः मित्रम् ताडयति ।

उपरितनेषु वाक्येषु अनुस्वारस्य स्थाने मकारस्य लेखनं दोषाय ।

प्रथमवाक्ये 'कन्दुक'शब्दे ककारोत्तरम् मकारः लिखितः अस्ति । तस्य पुरतः 'न'कारः अस्ति ।
द्वितीयवाक्ये 'शाटिका'शब्दे काकारोत्तरम् मकारः लिखितः अस्ति । तस्य पुरतः 'प'कारः अस्ति ।
तृतीयवाक्ये 'मित्र'शब्दे रकारोत्तरम् मकारः लिखितः अस्ति । तस्य पुरतः 'त'कारः अस्ति ।

नियमः - अनुस्वारात् व्यञ्जने परे अनुस्वारः एव लेखनीयः, न तु मकारः । अतः
तानि वाक्यानि एवं लेखनीयानि ।

१ शिशुः कन्दुकं नयति । २ नव्या शाटिकां पश्यति । ३ विक्रमः मित्रं ताडयति ।

## वाक्यस्य अन्ते

१ सुमनया क्षीरं पीतं ।
२ सन्दीपेन कार्यं करणीयं ।
३ महेशेन पद्यं पठितं ।

एतानि वाक्यानि दोष पूर्णाः । नियमः - अवसाने अपि मकारः एव लेखनीयः । तस्मात्
अतः तानि वाक्यानि एवं लेखनीयानि ।

१ सुमनया क्षीरं पीतम् ।
२ सन्दीपेन कार्यं करणीयम् ।
३ महेशेन पद्यं पठितम् ।

## ।। अभ्यासः।।

अधः दत्तानि वाक्यानि शुद्धं लिखत ।

१ सात्विकजीवनम् यापितवान् कश्चन वृद्धः कदाचित् शय्यां आश्रितवान् ।
२ किञ्चित् श्रीगन्धचूर्णं पुष्पम् फलं च आनीयतां ।
३ सत्यं उक्तं भवता ।
४ अन्येन दत्तम् स्वीकर्तुं न इच्छति मम मित्रं ।
५ अनुजेन सह अधिकम् सम्भाषणम् न कृतं ।

### ।। परसवर्णलेखनम् ।।

संस्कृतभाषां देवनागरीलिप्या लेखनावसरे केषुचित् विषयेषु अवधातव्यं भवति । तेषु अनुस्वार-मकारयोः लेखनं कश्चन विषयः। अपरः अंशः अस्ति परसवर्णलेखनम् । अत्र सः विषयः प्रस्तूयते ।

अधः लिखितानि पदानि परिशीलयत ।

अंगणम् पंकजम्, क्रौंचः, गांधारम्, किंतु, गच्छंति, चिंतयति, चंद्रः, शांतिः, परंपरा, चंपकम्, तंबूरम्, कंटकः, अंडम्, कंडोलः किम् एतानि शुद्धानि ? न ।
अनुस्वारस्य पुरतः वर्गीयव्यञ्जनानि यवलाश्च यदा भवन्ति तदा सदृशः परसवर्णः लेखनीयः । सूत्रम् - अनुस्वारस्य ययि परसवर्णः (८-४-५८) इति पाणिनिसूत्रम् । एतादृशेषु स्थलेषु परसवर्णरहितानि (अनुस्वारसहितानि) रूपाणि असाधूनि एव । अतः उपरिलिखितानां शब्दानां शुद्धानि रूपाणि एवं सन्ति -
अङ्गणम् पङ्कजम्, क्रौञ्चः, गान्धारम्, किन्तु, गच्छन्ति, चिन्तयति, चन्द्रः, शान्तिः, परम्परा, चम्पकम्, तम्बूरम्, कण्टकः, अण्डम्, कण्डोलः, इदं नित्यं सम्भवति ।
विकल्पेन पदान्ते तु परसवर्णः विकल्पेन ।
सूत्रम् - अनुस्वारस्य ययि परसवर्णः (८-४-५८) इति पाणिनिसूत्रम् ।
अतः
सङ्घटनम् / संघटनम्
सञ्चयः / संचयः
सम्भवति / संभवति
इति रूपद्वयमपि साधु एव । उपसर्गस्य पदत्वं (पदसंज्ञा) अस्ति इत्यतः ।
अभ्यासः
अधः दत्तान् शब्दान् शुद्धं लिखत ।
किंचित् , भूखंडः, गंतुम् , पारांतरितम् , संक्षिप्तम् , दंपती, संबंधः,
द्वित्वम्
केषाञ्चित् पदानां लेखनावसरे केचन वर्णाः द्विवारं लेखनीयाः भवन्ति । उच्चारणश्रवणात् एतत् द्वित्वं यद्यपि न अनुभवगोचरतां याति, तथापि लेखनावसरे तु तत् लेखनीयम् एव । कानिचन उदाहरणानि अधः दत्तानि सन्ति -
द्वित्वम् (सामान्यम् - १)

| अशुद्धानि | शुद्धानि |
|---|---|
| महत्वम् | महत्त्वम् (महत् + त्वम्) |
| सत्वम् | सत्त्वम् (सत् + त्वम्) |
| तत्वम् | तत्त्वम् (तत् + त्वम्) |
| सात्विकम् | सात्त्विकम् |
| उज्वलः | उज्ज्वलः (उत् + ज्वल) |
| पाश्चात्यः | पाश्चात्त्यः (पश्चात् + त्यक्) |
| कार्तिकमासः | कार्त्तिकमासः |
| तज्ञः | तज्ज्ञः (तत् + ज्ञः) |
| कित्वम् | कित्त्वम् (कित् + त्वम्) |
| छित्वा | छित्त्वा (छिद् + त्वा) |
| भित्वा | भित्त्वा (भिद् + त्वा) |
| उध्वस्तः | उद्ध्वस्तः (उत् + ध्वस्तः) |

## 3.3 ।। भविष्यत्कालः ।।

लुट् - प्रथम-भविष्यत्कालः / अनद्यतनभविष्यत्कालः।

लृट् - द्वितीय-भविष्यत्कालः / सामान्यभविष्यत्कालः।

लृट् लकार (= सामान्य भविष्य काल) जो आने वाले किसी भी समय में होने वाला हो । जैसे :--- रामः इदं कार्यं करिष्यति। (राम यह कार्य करेगा।)

अभ्यासः

सः गमिष्यति। सः कुत्र गमिष्यति**?** सः गृहं गमिष्यति।

उपर्युक्तवाक्ये सः प्रथमपुरुष-एकवचनम् कर्ता अस्ति। कर्तरिः प्रथमाविभक्तिः भवति। कर्तुः पुरुषवचनानुसारं क्रियायाः पुरुषवचनम् अपि भवति। अत्र" गृहं " इति पदं कर्म अस्ति। कर्मणि द्वितीयाविभक्तिः भवति। यथा - रामः ग्रामं गमिष्यति। तौ विद्यालयं गमिष्यतः। ते नगरं गमिष्यन्ति। त्वं कुत्र गमिष्यसि ? युवां कुत्र गमिष्यथः? यूयं कुत्र गमिष्यथ? अहं जयपुरं गमिष्यामि। आवां मन्दिरं गमिष्यावः। वयम् उदयपुरं गमिष्यामः।

## 3.4 ।।चर्चा।।

संस्कृते चर्चां कुर्यात्। गणद्वयं कुर्यात्। प्रथमः गणः द्वितीयस्य गणस्य खण्डनं कुर्यात्। द्वितीयः गणः प्रथमगणस्य खण्डनं कुर्यात्। विषयाः

1. संस्कृतम् राष्ट्रीयभाषा स्यात् उत संस्कृतं राष्ट्रीयभाषा न स्यात्।
2. दूरवाणी बालकेभ्यः देया उत न देया।
3. आरक्षणं न स्यात् । आरक्षणं स्यात्।
4. महिलायाः स्थानं गृहे एव ।
5. अधिकं धनम्, अधिकं सुखम् ।
6. दूरदर्शनेन अधिकः लाभः, अल्पा हानिः ।
7. क्रिकेट्क्रीडा देशस्य कीर्त्यै ।

।।इति शम्।।